नवग्रहध्यानम्

{॥ नवग्रहध्यानम् ॥}

श्रीगणेशाय नमः ।

अथ सूर्यस्य ध्यानं - त्रिपुरासर्वस्वे

प्रत्यक्षदेवं विशदं सहस्रमरीचिभिः शोभितभूमिदेशम् ।

सप्ताश्वगं सद्ध्वजहस्तमाद्यं देवं भजेऽहं मिहिरं हृदब्जे ॥

अथ चन्द्रस्य ध्यानं - निःसृतमागमे

शङ्खप्रभमेणप्रियं शशाङ्कमीशानमौलिस्थितमीड्यवृत्तम् ।

तमीपतिं नीरजयुग्महस्तं ध्याये हृदब्जे शशिनं ग्रहेशम् ॥

अथ भौमस्य ध्यानं - आगमामृतमञ्जर्याम्

प्रतप्तगाङ्गेयनिभं ग्रहेशं सिंहासनस्थं कमलासिहस्तम् ।

सुरासुरैः पूजितपादपद्मं भौमं दयालुं हृदये स्मरामि ॥

अथ सौम्यस्य ध्यानं - भैरवतन्त्रे

सोमात्मजं हंसगतं द्विबाहुं शङ्खेन्दुरूपं ह्यसिपाशहस्तम् ।

दयानिधिं भूषणभूषिताङ्गं बुधं स्मरे मानसपङ्कजेऽहम् ॥

अथ जीवस्य ध्यानं - भैरवतन्त्रे

तेजोमयं शक्तित्रिशूलहस्तं सुरेन्द्रज्येष्ठैः स्तुतपादपद्मम् ।

मेधानिधिं हस्तिगतं द्विबाहुं गुरुं स्मरे मानसपङ्कजेऽहम् ॥

अथ शुक्रस्य ध्यानं - कुब्जिकासर्वस्वे

सन्तप्तकाञ्चननिभं द्विभुजं दयालुं

पीताम्बरं धृतसरोरुहद्वन्द्वशूलम् ।

क्रौञ्चासनं ह्यसुरसेवितपादपद्मं

शुक्रं स्मरे द्विनयनं हृदि पङ्कजेऽहम् ॥

अथ शनेर्ध्यानं - शुभदमागमामृते

नीलाञ्जनाभं मिहिरेष्टपुत्रं ग्रहेश्वरं पाशभुजङ्गपाणिम् ।

सुरासुराणां भयदं द्विबाहुं शनिं स्मरे मानसपङ्कजेऽहम् ॥

अथ सैंहिकेयस्य ध्यानं - वामकेश्वर तन्त्रे

शीतांशुमित्रान्तकमीड्यरूपं घोरं च वैडुर्यनिभं विबाहुम् ।

त्रैलोक्यरक्षाप्रदंमिष्टदं च राहुं ग्रहेन्द्रं हृदये स्मरामि ॥

अथ केतोश्च ध्यानं - तन्त्रसागरे

लाङ्गुलयुक्तं भयदं जनानां कृष्णाम्बुभृत्सन्निभमेकवीरम् ।

कृष्णाम्बरं शक्तित्रिशूलहस्तं केतुं भजे मानसपङ्कजेऽहम् ॥

॥ इति नवग्रहध्यानं सम्पूर्णम् ॥

Encoded and Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Navagraha Dhyanam Lyrics in Devanagari PDF
% File name : navagrahadhyaanam.itx
% Category : navagraha
% Location : doc_z_misc_navagraha
% Author : Traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Ravin Bhalekar ravibhalekar at hotmail.com
% Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com
% Latest update : October 12, 2005
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 13, 2015] at Stotram Website